# संस्कृतम् (कोड-सङ्ख्या - 122)
## आदर्श-प्रश्नपत्रम् *
## कक्षा - दशमी (2026-27)

**अवधिः - 3 होराः** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः –**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | | |
|---|---|---|---|
| 'क' खण्डः | : | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' खण्डः | : | रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' खण्डः | : | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' खण्डः | : | पठितावबोधनम् | 30 अङ्काः |

4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## 'क' खण्डः
## अपठितावबोधनम् (10 अङ्काः)

| | | |
|---|---|---|
| 1. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>एकस्मिन् ग्रामे एकः वृद्धः वसति स्म। तस्य त्रयः पुत्राः आसन्। त्रयोऽपि पुत्राः बुद्धिमन्तः आसन्, तथापि सः वृद्धः निश्चयम् अकरोत् यत् सः स्वक्षेत्रम्, भूमिं धनस्वर्णादिकं च तस्मै एव दास्यति यः सर्वाधिकः बुद्धिमान् सिद्धः भविष्यति। एकस्मिन् दिवसे सः वृद्धः सर्वान् पुत्रान् आहूय उक्तवान् - "हे पुत्राः! युष्मासु यः मम केनचिदपि कक्षं पूर्णरूपेण पूरयेत् अहं तस्मै स्वसम्पत्तिं दास्यामि। यूयं सर्वे एव बुद्धिमन्तः स्थ। गच्छत, क्रमशः प्रयासं च कुरुत।" सर्वप्रथमं ज्येष्ठः पुत्रः एकां शकटिकां पूरयित्वा कार्पासम् आनयत्, परम् एतेन तु कक्षस्य एकः एव भागः पूरितः जातः। कतिपयदिनपर्यन्तं विचार्य मध्यमः पुत्रः एकस्मिन् दिने शुष्क-तृणानि आनीय कक्षे स्थापितवान्। परम् एतेन अपि कक्षः पूर्णरूपेण न पूरितः रिक्तः एव आसीत्। अन्ते कनिष्ठस्य पुत्रस्य क्रमः आसीत्। सः विचिन्त्य एकं दीपकम् | 10 |

*अवधेयम् - 2026-27 इति शैक्षणिकसत्रे प्रश्नपत्रस्य प्रारूपे मूल्याङ्कनपद्धतौ च किमपि परिवर्तनं नास्ति।

| | | |
|---|---|---|
| | आनीतवान् कक्षे च तं दीपकं प्रज्वालितवान्। तस्य दीपकस्य प्रकाशेन समग्रः कक्षः झटिति एव पूरितः जातः। वृद्धः पिता कनिष्ठपुत्रस्य बुद्धिकौशलं वीक्ष्य प्रसन्नो जातः तस्मै च सर्वां सम्पत्तिम् अयच्छत्।<br>**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) केन समग्रः कक्षः पूरितः जातः?<br>(ii) वृद्धः कस्मै सर्वां सम्पत्तिम् अयच्छत्?<br>(iii) सर्वे पुत्राः कीदृशाः आसन्?<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) कनिष्ठः पुत्रः कक्षं पूरयितुं किमकरोत्?<br>(ii) वृद्धः पुत्रान् आहूय किम् उक्तवान्?<br>(iii) वृद्धः स्वसम्पत्तिं दातुं किं निश्चयम् अकरोत्?<br>**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**<br>**ई. यथानिर्देशम् उत्तरत -**<br>(i) 'विचिन्त्य' इति पदस्य पर्यायपदं अनुच्छेदे किं प्रयुक्तम्?<br>(क) आनीय (ख) पूरयित्वा<br>(ग) आहूय (घ) विचार्य<br>(ii) "अहं तस्मै स्वसम्पत्तिं दास्यामि।" अत्र 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?<br>(क) कनिष्ठपुत्राय (ख) मध्यमपुत्राय<br>(ग) वृद्धाय (घ) ज्येष्ठपुत्राय<br>(iii) 'कुरुत' इति क्रियापदस्य कर्तृपदं किम्?<br>(क) पुत्राः (ख) यूयम्<br>(ग) बुद्धिमन्तः (घ) प्रयासम् | <br><br>2×1=2<br><br><br><br>2×2=4<br><br><br><br>1<br>3×1=3 |

## 'ख' खण्डः

## रचनात्मकं कार्यम् (15 अङ्काः)

| | | |
|---|---|---|
| 2. अ | **भवान् तिलकनगरवासी आदित्यराजः। भवतः क्षेत्रे अस्वच्छतायाः मशकानां च महती समस्या अस्ति। अतः मञ्जूषायां दत्तानां पदानां सहायतया समस्यानिवारणार्थं नगरपालिका-अध्यक्षं प्रति प्रार्थनापत्रं लिखतु।**<br>**मञ्जूषा**<br>मशकाः, रोगाः, रात्रौ, स्वच्छतायाः अभावः, वीथिसु, जलसङ्ग्रहः, जनजागरणम्, स्वच्छतायै, कर्मकराः, अवकरः, स्थाने-स्थाने, वर्धमानाः, उपायाः, निरीक्षणम्।<br>**अथवा** | 5 |
| आ | **भवती देवयानी। भवत्याः सखी प्रज्ञा राज्यस्तरे दशमकक्षायां प्रथमं स्थानं प्राप्तवती अतः तस्यै शुभकामनार्थं मञ्जूषायां दत्तानां पदानां सहायतया तां प्रति पत्रं लिखतु।** | |

| | | |
|---|---|---|
| | **मञ्जूषा**<br>परिणामः, परिश्रमस्य, हर्षस्य, वर्धापनानि, छात्राः, ज्ञात्वा, उज्ज्वलभविष्यम्, समाचारपत्रे, आशीर्वादः, प्रशंसाम्, ख्यातिम्, आदर्शः, प्रेरणा, प्रसन्नः। | |
| 3. अ | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत –**<br><br>**मञ्जूषा**<br>रेलस्थानकम्, यात्रिणः, रेलयानानि, गच्छन्ति आगच्छन्ति, प्रतीक्षाम्, स्वच्छता, विक्रेतारः, विक्रीणन्ति, सम्मर्दः, वस्तूनि, आसन्देषु, गमनागमनम्, यातायातस्य। | 5×1=5 |
| | **अथवा** | |
| आ | **मञ्जूषायां प्रदत्तशब्दानां साहाय्येन अधोलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -**<br>**"खेलनस्य महत्त्वम्"**<br>**मञ्जूषा**<br>रुचिः, शरीरस्य विकासः, मानसिकस्वास्थ्यम्, सुदृढम्, स्वस्थमस्तिष्कः, व्यायामः, नीरोगः, रक्तसञ्चालनम्, बाल्यकाले, शरीरम्, रोगाः, मनः प्रसन्नम्, जीवनवृत्तिः। | |
| 4. | **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत –**<br>(i) वर्षाकाल में किसान प्रसन्न होते हैं।<br>Farmers are happy during the rainy season.<br>(ii) पौष्टिकभोजन स्वस्थशरीर की कुंजी है।<br>Nutritious food is the key to a healthy body.<br>(iii) प्राचीनकाल में भी भारत ज्ञान और धन-धान्य से समृद्ध था।<br>Even in ancient times, India was prosperous in knowledge and wealth. | 5×1=5 |

| | | |
|---|---|---|
| | (iv) आप सफलता के लिए कठिन परिश्रम कीजिए।<br>Work hard for success.<br>(v) कृत्रिम बुद्धिमत्ता मानव की बड़ी सहायिका होगी।<br>Artificial intelligence will be a great helper to humans. | |
| | **‘ग’ खण्डः**<br>**अनुप्रयुक्तव्याकरणम्** **(25 अङ्काः)** | |
| 5. अ | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>(i) <u>**सम्यक् + नेता**</u> एव राष्ट्रोन्नत्यै प्रयतते।<br>(ii) तत्रत्यः कर्मचारी समागत्य <u>**न्यवेदयत्**</u>।<br>(iii) <u>**एक एव**</u> खगो मानी वने वसति चातकः।<br>(iv) सिंहः वा स्यात् अथवा अन्यः <u>**कः + अपि**</u>।<br>**अथवा** | 4×1=4 |
| आ | **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>(i) <u>**यत् + मानुषाद्**</u> अपि विभेषि ।<br>(ii) <u>**अश्वश्चेद्**</u> धावने वीरः<br>(iii) अस्ति <u>**देउलाख्यो ग्रामः**</u> ।<br>(iv) <u>**द्वौ + अपि**</u> गृहमागच्छतः। | |
| 6. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत –**<br>(i) तदेवाहुः <u>**महात्मानः**</u> समत्वमिति तथ्यतः।<br>(क) महान् आत्मा येषां ते (ख) महान् आत्मा<br>(ग) महान् आत्मानः (घ) महान् आत्मा ते<br>(ii) रिक्तोऽसि यत् <u>**जलद**</u> ! सैव तवोत्तमा श्रीः।<br>(क) जलेन दीयते इति (ख) जलाय ददाति इति<br>(ग) जलं ददाति इति (घ) जले दीव्यति इति<br>(iii) प्रस्तरतले <u>**लतातरुगुल्मा**</u> नो भवन्तु पिष्टाः।<br>(क) लताः च तरुगुल्माः च (ख) लता च तरू च गुल्माः<br>(ग) लता इव तरुगुल्माः (घ) लताः च तरवः च गुल्माः च<br>(iv) वानरः - (<u>**सगर्वम्**</u>) अतएव कथयामि यत् अहमेव योग्यः।<br>(क) सह गर्वम् (ख) गर्वेण सह<br>(ग) गर्वस्य अभावः (घ) गर्वस्य पश्चात् | 4×1=4 |
| 7. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत -** | 4×1=4 |

***अवधेयम्** - 2026-27 इति शैक्षणिकसत्रे प्रश्नपत्रस्य प्रारूपे मूल्याङ्कनपद्धतौ च किमपि परिवर्तनं नास्ति।

<table>
<tr><td></td><td>(i) त्यक्त्वा धर्मप्रदां वाचं <u>**परुषां**</u> योऽभ्युदीरयेत्।<br>(क) परुष + त्व (ख) परुष + तल्<br>(ग) परुष + टाप् (घ) परुष + ङीप्<br>(ii) सर्वेषामेव मत्कृते <u>**महत् + त्व**</u> विद्यते यथासमयम्।<br>(क) महत्वम् (ख) महत्त्वम्<br>(ग) महत्ता (घ) महत्वभूतः<br>(iii) गिरां सन्दर्भोऽयं प्रथममवतीर्णो <u>**वसुमतीम्**</u>।<br>(क) वसु + मतुप् (ख) वसु + ठक्<br>(ग) वसु + तल् (घ) वसुमत् + टाप्<br>(iv) किं न <u>**श्रुता**</u> त्वया पञ्चतन्त्रोक्तिः।<br>(क) श्रु + टाप् (ख) श्रु + ठक्<br>(ग) श्रु + त्व (घ) श्रु+ क्त</td><td></td></tr>
<tr><td>8.</td><td>**वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखित-वाक्यानि पुनः लिखत –**<br>(i) बालकैः --------------- गीयन्ते।<br>(क) कविता (ख) कविताम्<br>(ग) कविताः (घ) कवितया<br>(ii) मया कदापि असत्यं न ------------- ।<br>(क) वदामि (ख) उद्यते<br>(ग) वद्यते (घ) वदति<br>(iii) --------------- कार्याणि समयेन सम्पाद्यन्ते।<br>(क) अस्माभिः (ख) वयम्<br>(ग) यूयम् (घ) ते</td><td>3×1=3</td></tr>
<tr><td>9.</td><td>**कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत-**<br>अद्यतन-कार्यक्रमेषु सर्वप्रथमं प्रातः (i) -------------- (4:30) वादने ध्यानस्य अभ्यासः अस्ति, तदनन्तरं (ii) --------- (05:45) वादने प्रार्थनासभा निश्चिता अस्ति। तत्पश्चात् (iii) ------- (7:15) वादने क्रीडाः, (iv) ----------- (9:00) वादने च प्रतियोगिताः आरम्भाः भविष्यन्ति।</td><td>4×1=4</td></tr>
<tr><td>10.</td><td>**मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -**<br>(i) केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् -------।<br>(ii) यदि अहं कृष्णवर्णः ----------- त्वं किं गौराङ्गः?<br>(iii) गमनकाले मार्गे --------- सिंहः आगतः।<br>**मञ्जूषा**</td><td>3×1=3</td></tr>
</table>

| | | |
|---|---|---|
| | तर्हि, सहसा, वृथा। | |
| 11. | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत –**<br>(i) यूयम् अधुना कुत्र **गच्छसि**?<br>(क) गच्छन्ति (ख) गच्छथः<br>(ग) गच्छथ (घ) गच्छामः<br>(ii) गतवर्षे अहं परीक्षां न **लिखेयम्**।<br>(क) लेखिष्यामि (ख) लिखामि<br>(ग) लिखानि (घ) अलिखम्<br>(iii) **लताभिः** शुष्कपत्राणि पतन्ति।<br>(क) लताः (ख) लताभ्यः<br>(ग) लतायै (घ) लतासु | 3×1=3 |
| | **'घ' खण्डः**<br>**पठितावबोधनम् (30 अङ्काः)** | |
| 12. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुम् आरभत- 'चौरोऽयम्, चौरोऽयम्' इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्। अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्। | 5 |
| | **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) आरक्षी चौर्याभियोगे कं न्यायालयं नीतवान्?<br>(ii) चौरः काम् आदाय पलायितः?<br>(iii) वस्तुतः चौरः कः आसीत्? | 2×½=1 |
| | **II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) अतिथिः केन प्रबुद्धः?<br>(ii) किं विचित्रम् अघटत?<br>(iii) ग्रामवासिनः किम् अकुर्वन्? | 2×1=2 |
| | **III. (अ) निर्देशानुसारम् उत्तरत -**<br>(i) 'ग्रामवासिनः' इति पदस्य विशेषणपदं गद्यांशात् चित्वा लिखत ।<br>(ii) 'प्रविश्य' इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम्<br>**अथवा** | 2×1=2 |

***अवधेयम् -** 2026-27 इति शैक्षणिकसत्रे प्रश्नपत्रस्य प्रारूपे मूल्याङ्कनपद्धतौ च किमपि परिवर्तनं नास्ति।

(आ) निर्देशानुसारम् उत्तरत -

(i) “तस्य तारस्वरेण प्रबुद्धाः ग्रामवासि...” अत्र ‘तस्य’ इति पदं कस्मै प्रयुक्तम्?

(ii) ‘प्राक्षिपत्’ इति क्रियापदस्य कर्तृपदं गद्यांशात् चित्वा लिखत ।

13. अधोलिखिते पद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 5

**क्रोधो हि शत्रुः प्रथमो नराणां, देहस्थितो देहविनाशनाय।**
**यथास्थितः काष्ठगतो हि वह्निः, स एव वह्निर्दहते शरीरम्॥**
**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता॥**

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×½=1

(i) नराणां प्रथमः शत्रुः कः मन्यते?

(ii) बाल्ये विद्याधनं कः ददाति?

(iii) क्रोधः कुत्र स्थितः भवति?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(i) क्रोधः मानवशरीरे किमर्थं तिष्ठति?

(ii) का उक्तिः पितरं प्रति कृतज्ञता भवति?

(iii) पिता कस्मै विद्याधनं ददाति?

III. (अ) निर्देशानुसारम् उत्तरत - 2×1=2

(i) “पिताऽस्य किं तपस्तेपे।” अत्र ‘अस्य’ इति सर्वनामपदं कस्मै प्रयुक्तम्?

(ii) ‘अग्निः’ इति पदस्य पर्यायपदं चित्वा लिखत।

**अथवा**

(आ) निर्देशानुसारम् उत्तरत -

(i) 'शत्रुः प्रथमो' अनयोः पदयोः विशेष्यपदं किम्?

(ii) 'यच्छति' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 5

**रामः** - एषः भवतोः सौन्दर्यावलोकजनितेन कौतुहलेन पृच्छामि, क्षत्रियकुल-पितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता?

**लवः** - भगवन् सहस्रदीधितिः ।

**रामः** - कथमस्मतसमानाभिजनौ संवृत्तौ?

**विदूषकः** - किं द्वयोरप्येकमेव प्रतिवचनम्?

**लवः** - भ्रातरावावां सोदर्यौ।

**रामः** - समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

**लवः** - आवां यमलौ

**रामः** - सम्प्रति युज्यते। किं नामधेयम्?

| | | |
|---|---|---|
| | **लवः** – आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम्-<br>**कुशः** - अहमपि कुश इत्यात्मानं श्रावयामि।<br>**रामः** - अहो! उदात्तरम्यः समुदाचारः। किं नामधेयो भवतोर्गुरुः?<br>**लवः** - ननु भगवान वाल्मीकिः।<br>**रामः** - केन सम्बन्धेन?<br>**लवः** - उपनयनोपदेशेन।<br><br>I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) क्षत्रियकुलपितामहौ कौ स्तः?<br>(ii) अत्र कौ यमलौ स्तः?<br>(iii) लवकुशयोः वंशस्य कर्त्ता कः?<br>II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) वाल्मीकिः केन सम्बन्धेन लवकुशयोः गुरुः?<br>(ii) कौ भ्रातरौ सोदर्यौ स्तः?<br>(iii) रामः कीदृशेन कौतुहलेन लवकुशौ पृच्छति?<br>III. (अ) निर्देशानुसारम् उत्तरत -<br>(i) 'शिष्टाचारः' इत्यर्थे किं पदं प्रयुक्तम्?<br>(ii) 'श्रावयामि' इति क्रियापदस्य किं कर्तृपदं नाट्यांशे प्रयुक्तम्?<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>(ii) 'सूर्यः' इति पदस्य पर्यायपदं नाट्यांशात् चित्वा लिखत।<br>(ii) "आवां यमलौ" अत्र 'आवाम्' इति सर्वनामपदं काभ्यां प्रयुक्तम्? | <br><br><br><br><br><br><br>2×½=1<br><br><br><br>2×1=2<br><br><br><br>2×1=2 |
| | | |
| 15. | रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत -<br>(i) सर्वे **<u>प्रकृतिमातरं</u>** प्रणमन्ति।<br>(ii) गावः **<u>गोभिः</u>** सह व्रजन्ति।<br>(iii) पतितं वृषभं दृष्ट्वा **<u>सुरभिः</u>** अश्रूणि मुञ्चति।<br>(iv) **<u>पतङ्गाः</u>** परितः अम्बरपथम् आपेदिरे। | 4×1=4 |
| | | |
| 16.अ | मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –<br>**निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।**<br>**अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात्॥**<br>**अन्वयः** - सा (i) ------------ निजबुद्ध्या व्याघ्रस्य (ii) ------------ विमुक्ता। लोके अन्यः<br>(iii) ----------- अपि महतः भयात् (iv) ------------ । | 4×1=4 |

*अवधेयम् - 2026-27 इति शैक्षणिकसत्रे प्रश्नपत्रस्य प्रारूपे मूल्याङ्कनपद्धतौ च किमपि परिवर्तनं नास्ति।

| | | |
|---|---|---|
| | **मञ्जूषा**<br>मुच्यते, भयात्, भामिनी, बुद्धिमान्।<br>**अथवा** | |
| आ | **मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**<br>**कज्जलमलिनं धूमं मुञ्चति शतशकतीयानम्।**<br>**वाष्पयानमाला सन्धावति वितरन्ती ध्वानम्॥**<br>**यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्॥**<br>**भावार्थः** - अस्मिन् श्लोके कविः महानगरस्य जीवनस्य व्यस्ततायाः प्रदूषणस्य च विषये कथयति यत् महानगरेषु शतशः (i) ------- कृष्णवर्णं धूम्रं विसृजन्ति, रेलयानानि (ii) ------- कुर्वन्ति धावन्ति च। अत्र यानानां पङ्क्तयः (iii) ----------- सन्ति येन चलनं महत् (iv) ---------- वर्तते।<br>**मञ्जूषा**<br>ध्वनिम्, कठिनम्, यानानि, अनन्ताः। | |
| 17. | **अधोलिखित-कथांशं समुचित-क्रमेण लिखत –**<br>(i) रुदती सुरभिं दृष्ट्वा सुराधिपः तामपृच्छत्।<br>(ii) सा अकथयत् - अहं पुत्रस्य दैन्यं दृष्ट्वा रोदिमि।<br>(iii) स्वपुत्रं पतितं दृष्ट्वा सर्वधेनूनां माता सुरभिः अरोदत्।<br>(iv) अयि शुभे! किमेवं रोदिषि?<br>(v) दुर्बलः बलीवर्दः गन्तुमशक्तः भूमौ अपतत्।<br>(vi) सः कृषकः कर्षणविमुखः सन् बलीवर्दौ नीत्वा गृहम् अगच्छत्।<br>(vii) अचिरादेव तत्र चण्डवातेन मेघरवैश्च प्रवर्षः समजायत।<br>(viii) कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। | 8×½=4 |
| 18. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>(i) वने **<u>करी</u>** च सिंहस्य बलं जानाति।<br>(क) करः (ख) गजः (ग) व्याघ्रः (घ) काकः<br>(ii) **<u>भृङ्गाः</u>** रसालमुकुलानि समाश्रयन्ते।<br>(क) भानुः (ख) पुष्पाणि (ग) आम्राणि (घ) भ्रमराः<br>(iii) सः केनापि प्रकारेण **<u>परैः</u>** न परिभूयते।<br>(क) पक्षैः (ख) पक्षिभिः (ग) परकीयैः (घ) नृपैः | 3×1=3 |

-------------0000--------------

***अवधेयम्** - 2026-27 इति शैक्षणिकसत्रे प्रश्नपत्रस्य प्रारूपे मूल्याङ्कनपद्धतौ च किमपि परिवर्तनं नास्ति।